# स्वप्नवासवदत्तम्

प्रथमोऽङ्कः

**सविश्रमो ह्ययं भारः प्रसक्तस्तस्य तु श्रमः ।**

**तस्मिन् सर्वमधीनं हि यत्राधीनो नराधिपः ॥१५॥**

**अन्वय-** हि (मम्) अयम् भारः सविश्रमः, तु तस्य श्रमः प्रसक्तः, हि नराधिपः यत्र अधीनः, सर्वम् तस्मिन् अधीनम् ।

**अनुवाद-** निश्चय ही मेरा यह भार विश्रामयुक्त है, किन्तु उसका परिश्रम तो निरन्तर है, क्योंकि राजा जिसके अधीन है, सभी कुछ उसी के अधीन रहता है ।

**खगा वासोपेताः सलिलमवगाढो मुनिजनः**

**प्रदीप्तोऽग्निर्भाति प्रविचरति धूमो मुनिवनम् ।**

**परिभ्रष्टो दूराद्रविरपि च संक्षिप्तकिरणो**

**रथं व्यावर्त्यासौ प्रविशति शनैरस्तशिखरम् ॥१६॥**

**अन्वय-** खगाः वास-उपेताः, मुनिजनः सलिलम् अवगाढः, प्रदीप्तः अग्निः भाति, धूमः मुनिवनम् प्रविचरति, अपि च दूरात् परिभ्रष्टः रविः, संक्षिप्तकिरणः सन्, रथम् व्यावर्त्य शनैः अस्तशिखरम् प्रविशति ।

**अनुवाद-** पक्षी अपने निवास स्थानों में चले गये हैं, तपस्वी लोग जल में प्रविष्ट हो गए हैं, प्रज्वलित यज्ञाग्नि सुशोभित हो रही है, (यज्ञ का) धुआँ तपोवन में अत्यधिक फैल रहा है, एवं दूर से गिरा हुआ सूर्य, अपनी किरणों को सिमेटे हुए, रथ को लौटाकर धीरे-धीरे अस्ताचल में प्रवेश कर रहा है ।